अम छरित्र ंअन्जरि

श्रीमान विष्णुः प्रजातो दशरथनृपते रामनाथोऽथ नीतो
विश्वामित्रेण मंत्राहृदनुजसहितस्ताटकघातुकोऽस्त्रम ।
ब्राह्मादय्ं प्राप्य हत्वा निशिचरनिकरं यज्ञपालो विमोच्या-
हल्यां शापाच्च भंक्त्वा शिवधनुरुपयन जानकीं नः प्रसीदेत ॥ १॥

आयन रामः सभार्योध्वनि निजसहजैर्भार्गवेष्वासरोषा-
द्धत्वा सुरारिं पुरग उत नुतस्तापसैर्भूपपृष्ठैः ।
कल्याणानंतधर्मोऽगुणलवरहितः प्राणिनामंतरात्मे-
त्याद्युक्तश्चाभिषेके पुरजनमहितो महयतां मे वचोभिः ॥ २॥

कैकेयीप्रीतिहेतोः स सहजनृपजोवल्कली यानरण्यं
गंगातारी गुहार्च्यः कृतरुचिरजटो गीष्पतेः पुत्रमान्यः ।
तीर्त्वा कृष्णां प्रयातोऽवतु निजममलं चित्रकूटं प्रपन्नं
स्वांबाभिर्भ्रातरं तं श्रुतजनकगतिः सांत्वयन न्युप्ततीर्थः ॥ ३॥

दत्वाऽस्मै पादुके स्वे क्षितिभरणकृतौ प्रेष्य तं काकनेत्रं
व्यस्याराज्योऽत्रिनाम्नो वनमथ समितो दंडकं तापसेष्टम ।
कुर्वन हत्वा विराधं खलकुलदमनं याचितस्तपसाग्र्यै-
स्तेषां दत्वाऽभयं स्वानसिधनुरिषुधीन यानगस्त्त्यात स पायात ॥ ४॥

आसीनः पंचवट्यामकुरुत विकृतां राक्षसीं यो द्विसप्त-
क्रव्यादानप्यनेकानथ खरमवधीद दूषणं च त्रिशीर्षम ।
मारीचं मार्गरूपं दशवदनहृतामाकृतिं भूमिजां यां
अन्विष्यन्नार्तगृध्रं स्वगतिमथ नयन मामवेत घ्नन कबंधम ॥ ५॥

पंपातीरं स गच्छन्निह कृतवसतिर्भक्तितुष्टः शबर्यै
दत्वा मुक्तिं प्रकुर्वन हनुमत उदितं प्राप्तसुग्रीवसख्यः ।
सप्त च्छित्वा सालान विधिवरबलिनो वालिभित्सूर्यसूनुं
कुर्वाणो राज्यपालं समवतु निवसन माल्यवत्कंदरेसौ ॥ ६॥

नीत्वा मासान कपीशानिह दश हरितः प्रेष्य सीतां विचित्या-
यातश्रीमद्धनूमद्गिरमथ समनुश्रुत्य गच्छन कपींद्रैः ।

सुग्रीवाद्यैरसंख्यैर्दशमुखसहजं मानयन्नब्धिवाचा
दैत्यघ्नः सेतुकारी रिपुपुररुदवेद्वानैर्वैरिघाती ॥ ७॥

भग्नं कृत्वा दशास्यं गुरुतरवपुषं कुंभकर्णं निहत्य
प्रध्वस्ताशेषनागं पदकमलनतं ताक्ष्र्यमानंद्य रामः ।
सर्वानुज्जीवयंतं गिरिधरमनघश्चांजनेयं कपीन स्वान
विज्ञानास्त्रेण रक्षन समवतु दमयंल्लक्ष्मणाच्छक्रशत्रुम ॥ ८॥

क्रव्यादान घ्नन्न्संख्यानपि दशवदनं ब्रह्मपूर्वैः सुरेशैः
पुष्पैराकीर्यमाणो हुतवहविमलमाप्य सीतां विधाय ।
रक्षोनाथं स्वभक्तं स्वपुरमथ गतः पुष्पकस्थः समस्तैः
साम्रज्ये चाभिषिक्तो निजजनमखिलं मानयन मे गतिः स्यात ॥ ९॥

रक्षन क्षोणीं समृद्धां नुत उत मुनिभिर्मानयन वायुसूनुं
प्रेष्यादित्यात्मजादीन व्यतनुत भरतं यौवराज्येऽनुमान्य ।
कार्ये सौमित्रिमार्तश्वगदितकृदरिघ्नोऽथ शत्रुघ्नो यो
हत्वाऽसौ दुष्टशूद्रं द्विजसुतगुबवेत कुंभजान्मालभारी ॥ १०॥

यज्ञं तन्वन त्रिकोटीर्व्यतुदत भरताद्यैः सुरानीशवाक्या-
द्यास्यन धामात्रिपुरं भुजिमथ स नयन्नात्मसून स्वराज्ये ।
कृत्वा श्रीह्रीहनूमद धृतविमलचलच्चामरच्छत्रशोभी
ब्रह्माद्यैः स्तूयमानो निजपुरविलसत्पादपद्मोऽवतान्माम ॥ ११॥

इति श्रीरामचरित्रमंजरी लेशतः कृता ।
राघ्वेंद्रेण यतिना भूयाद्रामप्रसाददा ॥ १२॥

॥ इति श्रीमत्सुधींद्रकरकमलसंजात राघवेंद्रयतिकृता
श्रीरामचारित्रमंजरी संपूर्णा ॥